२ कुमारसम्भव:

३५०

१२५ पत्राणि

काव्य

कुमारसंभवमहाकाव्य

नं. ३३०-भि

कुमार संभवं।

(मूलं)

१२ पत्राणि

सं. ...

कर्ता—

म- कालिदास।

कुमार॰ ॥१॥

॥श्रीगणेशाय नमः॥ श्रीरामचंद्राय नमः॥ अस्त्युत्तरस्यां दिशि देवतात्मा हि
मालयो नाम नगाधिराजः॥ पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या
इव मानदंडः॥१॥ यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि
दोहदक्षे॥ भास्वंति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीं॥२॥ अनं
तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं॥ एको हि दोषो गु
णसंनिपाते निमज्जतींदोः किरणेष्विवांकः॥३॥ यश्चाप्सरोविभ्र
ममंडनानां संपादयित्रीं शिखरैर्बिभर्ति॥ बलाहकच्छेदविभक्त
रागामकालसंध्यामिव धातुमत्तां॥४॥ पदं तुषारस्रुतिधौत
रक्तं यस्मिन्नदृष्ट्वापि हतद्विपानां॥ विदंति मार्गं नखरंध्रमुक्तैः
मुक्ताफलैः केसरिणां किराताः॥५॥ आमेखलं संचरतां घनानां ॥१॥

शीलाचोरुहाकसीदोनतोमीदेव ॥ चेरावः कीचकासीसुषिरवंशसनीभिदुतः ॥ ६
वालव्यद्रुमसरः ॥ १ ॥
विद्याधराः [illegible] गंधर्वकिंनराः ॥ ३ ॥ समीरणोमवायुना ॥ ४ ॥

नांछायामधःसानुगतांनिषेव्य उद्वेजितावृष्टिभिराश्र [illegible] शृंगाणियस्या
तपवंतिसिद्धाः ६ न्यस्ताक्षराधातुरसेनयत्रभूर्जत्वचः कुंजरबिंदु
शोणाः व्रजंतिविद्याधरसुंदरीणामनंगलेखक्रियायोप [illegible] ७
यःपूरयन्कीचकरंध्रभागान्दरीमुखोत्थेनसमीरणेन उद्गास्य
तामिच्छतिकिंनराणांतानप्रदायित्वमिवोपगंतुं ८ कपोलकंडूः
करिभिर्विनेतुंविघट्टितानांसरलद्रुमाणां यत्रस्रुतक्षीरतयाप्रसू
तःसानूनिगंधःसुरभीकरोति ९ वनेचराणांवनितासखानां
दरीगृहोत्संगनिषक्तभासः भवंतियत्रौषधयोरजन्यामतैलपूरासु
रतप्रदीपाः १० उद्वेजयत्यंगुलिपार्ष्णिभागान्मार्गेशिलीभूतहिमे श्री ॥
पियत्र नदुर्वहश्रोणिपयोधरार्ताभिंदंति [illegible] मश्वमुख्यः ११ राम
दिवाकराद्रक्षतियोगुहासुलीनंदिवाभीतमिवांधकारं क्षु

२ रागति २

दिवाभीतंकरखकं ॥ १ ॥

कुमार॰ ॥२॥

डेपिनूनंशरणंप्रपन्नेममत्वमुच्चैशिरसांसतीव ॥१२॥ लांगूलविक्षे
पविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ॥ यस्यार्थयुक्तंगिरिरा
जशब्दं कुर्वन्तिवालव्यजनैश्चमर्यः ॥१३॥ यत्रांशुकाक्षेपविलज्जि
तानांयदृच्छयाकिंपुरुषांगनानां ॥ दरीगृहद्वारिविलंविबिंबा
स्तिरस्करिण्योजलदाभवन्ति ॥१४॥ भागीरथीनिर्झरसीक
राणांवोढामुहुःकंपितदेवदारुः ॥ यद्वायुरन्विष्टमृगैःकिरातैरा
सेव्यतेभिन्नशिखंडिबर्हः ॥१५॥ सप्तर्षिहस्तावचितावशेषाण्य
धोविवस्वान्परिवर्तमानः ॥ पद्मानियस्याग्रसरोरुहाणि प्रबोधय
त्यूर्ध्वमुखैर्मयूखैः ॥१६॥ यज्ञांगयोनित्वमवेक्ष्ययस्य सारंधरित्री
धरणक्षमंच ॥ प्रजापतिःकल्पितयज्ञभागंशैलाधिपत्यंस्वयमन्व
तिष्ठत् ॥१७॥ समानसींमेरुसखःपितॄणांकन्यांकुलस्यस्थि
तयेस्थितिज्ञः ॥ ॥श्री॥ २ लिप २

रामः ॥२॥ रामः

पक्ष्मानीक...

॥ मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ॥१८॥
कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसंगे ॥ मनो
रमं यौवनमुद्वहंत्या गर्भोऽभवद्भूधरराजपत्न्याः ॥१९॥ असू
त सा नागवधूपभोग्यं मैनाकमंभोनिधिबद्धसख्यं ॥ क्रुद्धे
ऽपि पक्षच्छिदि वृत्रशत्राववेदनाज्ञं कुलिशक्षतानां ॥२०॥
अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी ॥
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ॥२१॥
सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणे
न संपद् ॥२२॥ प्रसंनदिक्पांसुविविक्तवातं शंख

रामः

शिवः

॥ कुमा ॥

॥ ३ ॥

नांतरपुष्पवृष्टि ॥ शरीरिणांस्थावरजंगमानांसुखाय
तज्जन्मदिनंबभूव ॥ २३ ॥ तयादुहित्रासुतरांसवित्रीस्फुर
त्प्रभामंडलयाचकासे ॥ वैदूर्यभूमिर्नवमेघशब्दादुद्भिन्नया
रत्नशलाकयेव ॥ २४ ॥ दिनेदिनेसापरिवर्तमानालब्धो
दयाचांद्रमसीवलेखा ॥ पुपोषलावण्यमयान्विशेषान्
ज्योत्स्नांतराणीवकलांतराणि ॥ २५ ॥ तांपार्वतीत्याभिज
नेननाम्नाबंधुप्रियांबंधुजनोजुहाव ॥ उमेतिमात्रात
पसोनिषिद्धापश्चादुमाख्यांसुमुखीजगाम ॥ २६ ॥ महीभृ
तःपुत्रवतोपिदृष्टिस्तस्मिन्नपत्येनजगामतृप्तिं ॥ अनंत
पुष्पस्यमधोर्हिचूतेद्विरेफमालासविशेषसंगा ॥ २७ ॥
प्रभामहत्याशिखयेवदीपस्त्रिमार्गयेवत्रिदिवस्यमार्गः ॥

श्री रामः

॥ २

वसेव २

संस्कारैगिरामनीषीतयासपूतश्च विभूषितश्च ॥ २८ मंदा
किनीसैकतवेदिकाभिः साकंदुकैः कृत्रिमपुत्रकैश्च ॥
रेमेमुहुर्मध्यगतासखीनांक्रीडारसंनिर्विशतीवबाल्ये ॥
॥२९॥ तांहंसमालांशरदीवगंगांमहौषधीनक्तमिवात्म
भासः ॥ स्थिरोपदेशामुपदेशकालेप्रपेदिरेप्राक्तनजन्मवि
द्याः ॥ ३० ॥ असम्भृतंमंडनमंगयष्टेरनासवाख्यंकरणंमद
स्य ॥ कामस्यपुष्पव्यतिरिक्तमस्त्रंबाल्यात्परंसाथवयःप्रपे
दिरे ॥ ३१ ॥ उन्मीलितंतूलिकयेवचित्रंसूर्यांशुभिर्भिन्नमिवा
रविंदं ॥ बभूवतस्याश्चतुरस्रशोभिवपुर्विभक्तंनवयौवनेन ॥
॥ ३२ ॥ अभ्युन्नतांगुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरं
तौ ॥ आजह्रतुस्तच्चरणौपृथिव्यांस्थलारविंदश्रियमव्यवस्थां ॥ ३३ ॥

कुमार० ॥४॥

सा राजहंसैरिव संनतांगी गतेषु लीलांचितविक्रमेषु ॥ व्यनीयत प्रत्यु-
पदेशलुब्धैरादित्सुभिर्नूपुरसिंजितानि ॥३४॥ वृत्तानुपूर्वे च न
चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये ॥ शेषांगनिर्माणविधौ विधा-
तुर्लावण्यउत्पाद्य इवास यत्नः ॥३५॥ नागेंद्रहस्तास्त्वचि कर्कश-
त्वादेकांतशैत्यात्कदलीविशेषाः ॥ लब्ध्वापि लोके परिणाहि रू-
पं जातास्तदूर्वोरुपमानबाह्याः ॥३६॥ एतावता नन्वनुमेयशोभी
कांचीगुणस्थानमनिंदितायाः ॥ आरोपितं यद्गिरिशेन पश्चा-
दनन्यनारीकमनीयमंक ॥३७॥ तस्याः प्रविष्टा नत-
नाभिरंध्रं रराज तन्वी नवरोमराजिः ॥ नीवीमतिक्रम्य सितेतर-
स्य तन्मेखलामध्यमणेरिवार्चिः ॥३८॥ गंभीरनाभिह्रदसंनिधा-
नेरराजनीला नवरोमराजिः ॥ मुखेंदुभितस्तनचक्रवाकचंचु-
[illegible] नालमरीव ॥३९॥

श्री॰ श्रीरामः ॥४॥

॥मरगान्तं विभ्रम॥ ॥ ॥४ उसीऽपतीकुत्वीऽपत्र ३॥३ सत्वबद्ध सत्वबद्ध
॥ आहीवरद वरवऽमस्त्रियां॥

मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयु
क्तं॥४०॥ अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं चारु त
था प्रवृद्धं। मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रा
न्तरमप्यलभ्यं॥४१॥ शीरीषपुष्पाधिकसौकुमार्यो
बाहू तदीयाविति मे वितर्कः। पराजितेनापि कृतौ हरस्य
यौ कंठपाशौ मकरध्वजेन॥४२॥ तिरस्कृताशोकदल
प्रसूतौ पाणिद्वयं चारु नखांतरीयं। नवोदितेंदुर्[redacted]मस्स इति॥
शोभां व्योमकुदोषावीफलीचकार॥४३॥ कंठस्य तस्याः स्त
नबंधुरस्य मुक्ताकलापस्य च निस्तलस्य॥

१ साधु लिपाडंतरं

॥ कुमार ॥ ॥॥ १ ॥

अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ॥

॥४४॥ चंद्रंगता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां

॥ उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥

४५॥ पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थं ॥

॥ ततोनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥

४६॥ स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि ॥

॥ अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितंत्रीरिव ताड्यमाना

४७॥ प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या ॥

॥ तया गृहीतं नु मृगांगनाभ्यः स्ततो गृहीतं नु मृगांगनाभिः ॥

४८॥ तस्याः शलाकांजननिर्मितेव कांतिर्भ्रुवोरानतलेखयो

र्या॥ तां वीक्ष्य लीलाचतुरामनंगस्वचापसौंदर्यमदं मुमोच ॥ श्रीराम ॥ ५ ॥

॥४९॥ श्रीरामजयः ॥ ॥

तिर्यग्योनिनां२

॥लक्ष्मा गिरिस्थौ यदि चेतु सिस्याद संशयं पर्वतराजपुत्र्याः॥ तंके
शपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिथिलं चमर्यः॥५०॥
सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन॥ सानि
र्मिता विश्वसृजा प्रयत्नादेकस्थसौंदर्यदिदृक्षयेव॥५१॥
तांनारदः कामम्[illegible]रकदाचित्कन्यां किल प्रेक्ष्य पितुःसमीपे॥ स
मादिदेशैकवधूं भवित्रीं प्रेमणा शरीरार्द्धहरां हरस्य॥५२॥ गुरुः
प्रगल्भेपि वयस्यतोस्यास्तस्थौ निवृत्तान्यवराभिलाषः॥ ऋते कृ ॥कृशानुः
शानोर्न हि मंत्रपूतमर्हन्ति तेजांस्यपराणि हव्यं॥॥५३॥ अयाचि ॥पावको
तारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक॥ अभ्यर्थनाभं ॥नक्तः स्य
गभयेन साधुर्माध्यस्थमिष्टेप्यवलंबतेर्थे॥५४॥ यदैव पू ॥नरः॥५॥
ज्वलार र्वे[illegible]ने शरीरं सा दक्षरोषात्सुदती ससर्ज॥ तदाप्रभृत्येव विमु
क्तसंगः पतिः पशूनामपरिग्रहोभूत्॥५५॥ [illegible] निवासा

कुमा॰ ६

सस्तपसे जितात्मा गंगाप्रवाहोक्षितदेवदारुः ॥ प्रस्थं हिमाद्रे
र्मृगनाभिगंधि किंचित्क्वणत्किंनरमध्युवास ॥५४॥ गणा नमे
रुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्वसानाः ॥ मनःशि
लाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु ॥५५॥ तुषारसंघा
तशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान् ॥ दृष्टः कथंचि
द्गवयैर्विविग्नैः सोढसिंहध्वनिरुन्ननाद ॥५६॥ तत्राग्निमा
धाय समित्समिद्धं स्वमेव मूर्त्यंतरमष्टमूर्तिः ॥ स्वयं विधा
ता तपसः फलानां केनापि कामेन तपश्चचार ॥५७॥ अन
र्घ्यमर्घेण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा ॥
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजां ॥
॥५८॥ प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशो
नुमेने ॥ विकारहेतौ सति विक्रियंते येषां न चेतांसि त ए
व धीराः ॥५९॥

गण॥२॥ श्री॰ श्रीराम ॥६॥

अवचितबलिपुष्पावेदिसंमार्गदक्षानियमविधिजलानां
बर्हिषांचोपनेत्री॥ गिरिशमुपचचारप्रत्यहंसासुकेशीनि
यमितपरिखेदातच्छिरश्चंद्रपादैः॥६०॥ इतिश्रीकुमारसं
भवेमहाकाव्येकालिदासकृतौउमोत्पत्तिर्नामप्रथमःसर्
गः॥ श्रीरामचंद्रप्रसंनोस्तु॥ ॥ ॥ श्रीशिवाय॥
॥तस्मिन्विप्रकृताःकालेतारकेणदिवौकसः॥ तुरासाहंपुरोधाय
धामस्वायंभुवंययुः॥१॥ तेषामाविरभूद्[illegible] परिम्लानमुखश्रि
[illegible] यां॥ सरसांसुप्तपद्मानांप्रातर्दीधितिमानिव॥
॥२॥ अथसर्वस्यधातारंतेसर्वेसर्वतोमुखं॥ वागीशंवाग्भिर
र्थ्याभिःप्रणिपत्योपतस्थिरे॥३॥ नमस्त्रिमूर्तयेतुभ्यंप्राक्सृष्टेःकेवलात्मने॥
गुणत्रयविभागायपश्चाद्भेदमुपेयुषे॥४॥ यदमोघमपामन्तरुप्तंबीजमज
त्वया॥ अतश्चराचरंविश्वंप्रभवस्तस्यगीयसे॥५॥ तिसृभिस्त्वमवस्था

८
॥ कुमार ॥
॥८॥

मिर्महिमानमुदीरयन् । प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥६॥ स्त्री
स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया । प्रसूतिभाजः सर्गस्य तावेव
पितरौ स्मृतौ ॥७॥ स्वकालपरिमाणेन व्यस्तरात्रिंदिवस्य ते । यौ तु स्वप्नाव
बोधौ तौ भूतानां प्रलयोदयौ ॥८॥ जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः
। जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥९॥ आत्मानमात्मना वेत्सि सृज
स्यात्मानमात्मना । आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥१०॥
द्रवः संघातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः । व्यक्तो व्यक्तेतरश्चासि
प्राकाम्यं ते विभूतिषु ॥११॥ उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीर
णं । कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिरां ॥१२॥ त्वामामनन्ति
प्रकृतिं पुरुषार्थप्रवर्तिनीं । तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥१३॥

श्रीः
रामः ॥
॥८॥

श्रीराम ॥
श्रीशीव ॥

१४॥

द्पितॄणामपि पिता देवानामपि देवता । परतोपि परश्चासि विधाता वेधसामपि
त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः । वेद्यं च वेदिता चासि ध्याता ध्येयं च
यत्परं ॥१५॥ इति तेभ्यः स्तुतीः श्रुत्वा यथार्थहृदयंगमाः । प्रसादाभिमुखो वेधाः प्र
त्युवाच दिवौकसः ॥१६॥ पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता । प्रवृत्तिरासी
च्छब्दानां चरितार्था चतुष्टयी ॥१७॥ स्वागतं स्वानधीकारान्प्रभावैरवलंब्य वः ॥
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥१८॥ किमिदं द्युतिमात्मीयां न वि
भ्रति यथा पुरा । हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥१९॥ प्रशमा
दर्चिषामेतदनुद्गीर्णसुरायुधं । वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्य
ते ॥२०॥ किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः । मंत्रेण हतवीर्य
स्य फणिनो दैन्यमाश्रितः ॥२१॥ कुबेरस्य मनःशल्यं शंसतीव पराभ
वं ॥

॥ पा॰

अपविद्धगदोबाहुर्भग्नशाखइवद्रुमः॥२२॥ यमोपिविलिखन्भूमींदंडेना
स्तमितत्विषा॥ कुरुतेस्मिन्नमोघेपीनिर्वाणालातलाघवं॥२३॥ अमीच
कथमादित्याःप्रतापक्षतिशीतलाः॥ चित्रन्यस्ताइवगताःप्रकामालोकनीय
तां॥२४॥ पर्याकुलत्वान्मरुतांवेगभंगोनुमीयते॥ अंभसामोघसंरोधःप्रती
पगमनादिव॥२५॥ आवर्जितजटामौलिविलम्बिशशिकोटयः॥ रुद्राणा
मपिमूर्द्धानःक्षतहूंकारशंसिनः॥२६॥ लब्धप्रतिष्ठाःप्रथमंयूयंकिंबलव
त्तरैः॥ अपवादैरिवोत्सर्गाःकृतव्यावृत्तयःपरैः॥२७॥ श्री॥ तद्ब्रूतवत्साःकि
मितःप्रार्थयध्वंसमागताः॥ मयिसृष्टिर्हिलोकानांरक्षायुष्मास्ववस्थिता॥
॥२८॥ ततोमंदानिलोद्धूतकमलाकरशोभिना॥ गुरुंनेत्रसहस्रेण श्रीः
चोदयामासवासवः॥२९॥ ॥सद्विनेत्रोहरेश्चक्षुःसहस्रनयनाधिकं॥ ॥ श्रीरामः

रा.म.१९

वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनं ॥ ३० ॥ एवं वदासि भगवन्नाम्ह

वं नः परैः यदि ॥ प्रत्येकं विनियुक्तास्ताः कथं न द्रक्ष्यति प्रभुः ॥ ३१ ॥

त्वया दत्तवरो दीर्णस्तारकाख्यो महासुरः ॥ उत्पन्न वाधनो कानां

धूमकेतुरिवोत्थितः ॥ ३२ ॥ पुरे तावत्तमेवास्य तन्नोति रविरातप

॥ दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥ सर्वाभिः

सर्वदा चन्द्रस्तं कलाभिर्निषेवते ॥ नादत्ते केवलां लेखां हरचूडामणी

कृतां ॥ ३४ ॥ व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ॥ न वाति

वायुस्तत्पार्श्वे तालवृन्तानिलाधिकं ॥ ३५ ॥ श्रीरामजीवनमम ॥ पर्याय

सेवामुत्सृज्य पुष्पसंभारतत्पराः ॥ उद्यानपालसामान्यमृतवस्तमुपासते

॥ ३६ ॥ तस्योपायनयोग्यानि रत्नानि सरितांपतिः ॥ कथमप्यम्भसामन्तरा

निष्पत्तेः प्रतीक्षते ॥ ३७ ॥ ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ॥

कुमार॰।।
।।९।।

स्थिरप्रदीपतामेत्य भुजंगपतयोपासते ।।३८।। तत्कृतानुग्रहापेक्षी तं मुहुर्दूत
हारिभिः ।। अनुकूलयतीन्द्रोपि कल्पद्रुमविभूषणैः ।।३९।। इत्थमाराध्यमा
नोपी क्लिश्नाति भुवनत्रयं । शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः
।।४०।। तेनामरवधूहस्तैः सदयालूनपल्लवाः ।। अभिज्ञाश्छेदपातानां
क्रियंते नंदनद्रुमाः ।।४१।। वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।
।।चामरैः सुरवंदीनां बाष्पशीकरवर्षिभिः ।।४२।। उत्पाट्य मेरुशृंगाणि
क्षुण्णानि हरितां खुरैः ।। आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु
।।४३।। मंदाकिन्याः पयः शेषं दिग्वारणमदाविलं । हेमाम्भोरुहसस्या
नां तद्वाप्यो धाम सांप्रतं ।।४४।। भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूय
ते ।। खिलीभूते विमानानां तदापातभयात्पथि ।।४५।। यज्वभिः संभृतं
हव्यं वितते ष्वध्वरेषु सः ।। जातवेदोमुखान्मायी मिषतामाछिन
त्तिनः ।।४६।।

रामचंद्र
।।९।।
श्री

।।ध्व२

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च। देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः॥
॥४७॥ तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः। वीर्यवन्त्यौषधानीव वि
कारे सान्निपातिके॥४८॥ जयाशा यत्र चास्माकं प्रतिघातोत्थितार्च्चिषा॥
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितं॥४९॥ तदीयास्तोयदेष्वद्य पुष्करा
वर्त्तकादिषु। अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः॥५०॥ श्रीरामः॥
श्रा६ तदिच्छामो विभो स्रष्टुं सेनान्यं तस्य शान्तये। कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः॥५१॥
गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्। प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रि
यं॥५२॥ वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः॥ गर्जितानन्तरां वृष्टिं सौभाग्येन
जिगाय सा॥५३॥ संपत्स्यते वः कामोयं कालः कश्चित्प्रतीक्ष्यतां॥ न त्वस्य सिद्धौ यास्या
मि सर्गव्यापारमात्मना॥५४॥ इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयं॥ विषवृ
क्षोपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतं॥५५॥ वृतं तेनेदमेव प्राक् मया चास्मै प्रतिश्रु

तं॥ वरेण शमितं लोकानलं दग्धुं हि तत्तपः॥५६॥ संयुगे सांयुगीनं तमुद्यतं प्रस
हेत कः॥ अंशादृते निषिक्तस्य नीललोहितरेतसः॥५७॥ स हि देवः परं ज्योतिस्त
मःपारे व्यवस्थितं॥ परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना॥५८॥ उमारूपेण ते
यूयं संयमस्तिमितं मनः॥ शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्॥५९॥
उभे एव क्षमे वोढुमुभयोर्वीर्यमाहितं॥ सा वा शंभोस्तदीया वा मूर्त्तिर्जलमयी म
म॥६०॥ तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः॥ मोक्ष्यते सुरबन्दीनां वेणी
वीर्यविभूतिभिः॥६१॥ इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे॥ मनस्या
हितकर्त्तव्यास्तेपि देवा दिवं ययुः॥६२॥ तत्र निश्चित्य कन्दर्पमगमत्पाकशास
नः॥ मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा॥६३॥ अथ स ललितयोषिद्भ्रूल
ताचारुशृङ्गं रतिवलयपदाङ्के चापमासज्य कण्ठे॥ सहचरमधुहस्तन्यस्तचूताङ्कुरा
स्त्रः शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥६४॥ [redacted] ॥इति श्रीकुमारसंभवे म
हाकाव्ये कालिदासकृतौ कामदेवागमनं नाम द्वितीयः सर्गः॥ ॥ तस्मिन्मघो

पुष्पधन्वा[illegible] २

नःश्रिदन्ता न्विहायसहस्रमक्ष्णां युगपत्स्वपाल ॥ प्रयोजनापेक्षि भयाजभूर्णां ज्ञाय
लं गौरव माश्रितेषु ॥१॥ सर्वासवेनासनसन्निकृष्टं निशानिषीदेति विसृष्टमाभिः ॥
भर्तुः प्रसादं प्रति बुद्ध्यमूर्ध्व कुमिथः प्रारूमतेन मेवं ॥२॥ अज्ञापपन्ना ताविशेष
पुंसां लोके पुयने करिणीयमस्ति ॥ अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्द्धितु
पकूणातेप ॥३॥ केनाप्यसूर्या फलकांक्षिणा ते नीतां तदीयो जीनितात पोभिः ॥ यावं
द्भवमाहितसाध्रुकस्य मत्कामुकस्यास्यनिदेशावर्ती ॥४॥ असंमतः कस्तव मुक्ति
मार्गं पुनर्भवक्लेशभयात्प्रपन्नः ॥ बद्धश्चिरं तिष्ठतु सुन्दरीणां आमारोचितस्रस्तूलृलि
तेः कटाक्षैः ॥५॥ अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ॥
कस्यार्थधर्मौ वद पीडयामि सिंधोस्तटावोघइव प्रवृद्ध ॥६॥ कामेकपत्नीव्रत
दुःखशीलां लोलं मनश्चारुतया प्रविष्टां ॥ नितम्बिनीमिच्छसि मुक्तलज्जां कंठे स्वयं
ग्राहनिषक्तबाहुं ॥७॥ कयासि कामिन्सुरतापराधात्पादानतः कोपनयावधूतः ॥८॥

११ तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरं ॥८॥ प्रसीद विश्राम्यतु
वीर वज्रं शरैर्मदीयैः कतमः सुरारिः ॥ बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योपि
कोपस्फुरिताधराभ्यः ॥९॥ तव प्रसादात्कुसुमायुधोपि सहायमेकं मधुमे
व लब्ध्वा ॥ कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोन्ये ॥१०॥ अथोरु
देशादवतार्य पादमाक्रान्तिसंभावितपादपीठं ॥ संकल्पितार्थे विवृतात्म
शक्तिमाखण्डलः काममिदं बभाषे ॥११॥ सर्वं सखे त्वय्युपपन्नमेतदुभे ममा
[सु] स्त्रे कुलिशं भवांश्च ॥ वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥
॥१२॥ अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ॥ व्यादिश्यते भू
धरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥१३॥ आशंसता बाणगतिं वृषाङ्के कार्यं [तामवेक्ष्य]
त्वया नः प्रतिपन्नकल्पं ॥ निबोधयज्ञां [illegible] शभुजामिदानीमुच्चैर्द्विषामीप्सितमे
वमेतत् ॥१४॥ अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ॥ स च त्वदेकेषु ११

कु

निपातसाध्यो ब्रह्मांगभूर्ब्रह्मणि योजितात्मा ॥१५॥ तस्मै हिमाद्रेः प्रय
तां तनूजां यतात्मने रोचयितुं यतस्व ॥ योषित्सु तद्वीर्यनिषेकभूमिः सैव क्ष
मेत्यात्मभुवोपदिष्टं ॥१६॥ गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यंत
मधित्यकायां ॥ अन्यासत इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधि
ः सवर्गः ॥१७॥ तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोयमर्थांतरसाध्य एव
॥ अपेक्षते प्रत्ययमुत्तमं त्वां बीजांकुरः प्रागुदयादिवांभः ॥१८॥
अस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वं
॥ अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥१९
सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानां
॥ चापेन ते कर्म न चातिहिंस्रमहो बतासि स्पृहणीयवी

१२ षु॥२०॥ मधुश्च ते मन्मथ साहचर्यादसावनुक्तोपि सहाय एव॥
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य॥
२१॥ तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्र
12 तस्थे। ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तनुं
बिडौजाः॥२२॥ स माधवेनाभिमतेन सख्या रत्या च साशंकमनु
प्रयातः॥ अंगव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमव
तं जगाम॥२३॥ तस्मिन्वने संयमिनां मुनीनां तपःसमा
धेः प्रतिकूलवर्ती॥ संकल्पयोनेरभिमानभूतमात्मा शिव
नमाधाय मधुर्जजृम्भे॥२४॥ कुबेरगुप्तां दिशमुष्णर १२